वेदसार शिव स्तोत्रं

वेदसार शिव स्तोत्रं

पशूनां पतिं पापनाशं परेशं
गजेंद्रस्य कृत्तिं वसानं वरेण्यं |
जटाजूटमध्ये स्फुरद्गांगवारिं
महादेवमेकं स्मरामि स्मरारिं || 1 ||

महेशं सुरेशं सुरारातिनाशं
विभुं विश्वनाथं विभूत्यंगभूषं |
विरूपाक्षमिंद्वर्कवह्नित्रिनेत्रं
सदानंदमीडे प्रभुं पंचवक्त्रं || 2 ||

गिरीशं गणेशं गले नीलवर्णं
गवेंद्राधिरूढं गुणातीतरूपं |
भवं भास्वरं भस्मना भूषितांगं
भवानीकलत्रं भजे पंचवक्त्रं || 3 ||

शिवाकांत शंभो शशांकार्धमौळे
महेशान शूलिन् जटाजूटधारिन् |
त्वमेको जगद्व्यापको विश्वरूपः
प्रसीद प्रसीद प्रभो पूर्णरूप || 4 ||

परात्मानमेकं जगद्बीजमाद्यं
निरीहं निराकारमोंकारवेद्यं |
यतो जायते पाल्यते येन विश्वं
तमीशं भजे लीयते यत्र विश्वं || 5 ||

न भूमिर्न चापो न वह्निर्न वायु-
-र्न चाकाशमास्ते न तंद्रा न निद्रा |
न चोष्णं न शीतं न देशो न वेषो
न यस्यास्ति मूर्तिस्त्रिमूर्तिं तमीडे || 6 ||

अजं शाश्वतं कारणं कारणानां
शिवं केवलं भासकं भासकानां |
तुरीयं तमःपारमाद्यंतहीनं
प्रपद्ये परं पावनं द्वैतहीनं || 7 ||

नमस्ते नमस्ते विभो विश्वमूर्ते
नमस्ते नमस्ते चिदानंदमूर्ते |
नमस्ते नमस्ते तपोयोगगम्य
नमस्ते नमस्ते श्रुतिज्ञानगम्य || 8 ||

प्रभो शूलपाणे विभो विश्वनाथ
महादेव शंभो महेश त्रिनेत्र |
शिवाकांत शांत स्मरारे पुरारे
त्वदन्यो वरेण्यो न मान्यो न गण्यः || 9 ||

शंभो महेश करुणामय शूलपाणे
गौरीपते पशुपते पशुपाशनाशिन् |
काशीपते करुणया जगदेतदेक-
-स्त्वं हंसि पासि विदधासि महेश्वरोऽसि || 10 ||

त्वत्तो जगद्भवति देव भव स्मरारे
त्वय्येव तिष्ठति जगन्मृड विश्वनाथ |
त्वय्येव गच्छति लयं जगदेतदीश
लिंगात्मके हर चराचरविश्वरूपिन् || 11 ||

इति श्रीमत्परमहंस परिव्राजकाचार्य श्रीमच्छंकराचार्य विरचितं वेदसार शिव स्तोत्रं संपूर्णं |